International Journal of Academic Research
ISSN: 2348-7666; Vol.5, Issue-5, May, 2018
Impact Factor: 6.023; Email: drtvramana@yahoo.co.in

# संस्कृत रूपकपरिचयम्

**Dr. M.V.B. GANGADHARA RAO**
HOD, Department of Sanskrit,
K.G.R.L. Degree College,
BHIMAVARAM, W.G.Dt., A.P.

विश्वसाहित्य रङ्गे संस्कृत रूपकानां स्थानं अतीव विशिष्टम् । ''काव्येषु नाटकं रम्यंनाटकान्तं हि साहित्यम्'' इत्यार्योक्तिः । साहित्य जगति नाटक प्रक्रियायाः औन्नत्यं शिखरायमाणमिति प्रकटी करोति। (पात्रस्य) रूपारोपात् रूपकमिष्यते । रूपकाणां नाटका इति च नामान्तरंम् ।

रूपक साहित्य प्रक्रियायां अद्वितीयः भासः आद्य इति च गण्यते । भरतमुनिः, धनञ्जयः अपि रूपक प्रक्रिया अभिवृद्धये प्रसिद्ध सहायभूतौ । नाट्यशब्दः ''नट्'' धातुरुत्पन्नः । 'नट्' इति नृत् धातोः प्राकृतरुपम् । अस्मात् उत्पन्नाः 'नृत्त' 'नृत्य' 'नाट्य' नाटकशब्दाः एतत्भेधेन समानार्थकाः। एतेषां मूलभावः नटनानुकूलं पादविन्यासमिति । परन्तु एतेषां प्रक्रियादशायां भेदमपि विद्यते । पात्रगत व्यक्तिभाव प्रकटन पूर्वकं विविधदृश्य अनुकृतिकृत्य प्रेक्षकाणां मनसि श्रुङगरादि रसान् भावान् च उत्पादनमेव रूपकोद्धिष्टं प्रधान कार्यम् ।

परवर्ति कलिदासादि संस्कृत कवयः भासस्य नाटकरचना कलानैपुण्येन अतीव प्रभाविताः असन् । कालिदासः स्वीय मालविकाग्निमित्र नाटक प्रस्थावने पूर्व कवि स्तुतिरूपेण भासस्य नामोल्लेखनं कृत्वान् अतः भासः कालिदासस्य बहु प्राचीन इति प्रायः क्री. परं प्रथमशताब्दात् पूर्व इति विमर्शिकैः निर्णीतम् । भासरचिताः रूपकाः १३ इति ज्ञायते । भासमहाकवेः रचना प्रसादगुणोपेतम् भूत्वा विविध स्थायी भेदान् प्रेक्षकान् समुल्लसित हृदयान् करोति । एते १३ रूपकानां समूहः ''भासनाटकचक्रम्'' इति कथ्यते । भासस्य लोकोत्तरकल्पनाशक्तिः अद्भुतावहम् । रसपोषणे भासः सिद्धहस्तः महाकवीनां रचना नैपुण्यं सरस्वती देव्याः अङ्ग प्रत्यङ्ग रूपेण उपमित्वा एवं सुष्ठु कथितम् । ''भासो हासः कालिदासो विलासः'' इति । आर्थात् भासस्य कविता नैपुण्यं सरस्वती देव्याः दरहासः इति उपमितम् ।

की परं १९२२ वत्सरे महामहोपाध्याय बिरुदाङ्कितेन गणपतिशास्त्रिनः परिशोधना फलित रूपेण भासनाटकचक्रं साहित्यजगति प्रसिद्धं बभूव । तानि - १. स्वप्नवासवदत्तम् २. प्रतिज्ञा यौगन्धरायणम् ३. अवमारकम् ४. बालचरितम् ५. पञ्चरात्रम् ६. मध्यम व्यायोगम् ७. दूतवाक्यम् ८. कर्णभारम् ९. ऊरुभङ्गम् १०. दूतघटोत्कचम् ११. प्रतिमानाटकम् १२. अभिषेक नाटकम् १३ चारुदत्तम् । एव ।

कविकुलगुरुणा कलिदसेन रचितेषु विविध नाटकेषु १) मलविकग्नि मित्रं २) विक्रमोर्वशीयम् ३) अभिज्ञानशाकुन्तलं च शिरोरत्न सदृशाः ।

पाश्चात्य संस्कृत पण्डिताः कलिदास कृत अभिज्ञानशाकुन्तलं पठित्वा, प्रदर्शनमपि दृष्टवा मनोरञ्जिताः

बभूवुः । तेषु गोधे महशयः अनान्दतिरेखेण नृत्यमपि कृतान् इति ज्ञायते । अत एव –

**काव्येषु नाटकं रम्यम्**
**नाटकेषु शकुन्तला**
**तत्रापि च चतुर्थोऽङ्कः**
**तत्र श्लोक चतुष्टयम् ।।** इति श्रूयते ।

संस्कृत नाटकरङ्ग तत् कालेन सांघिक राजकीय, धार्मिक जीवन सरलिः वेषधारणा च प्रेक्षकाणां नेत्रपर्वं कुर्वन् तत् कथाकथन विधानं विशिष्यते । रूपकलक्षण निर्देशपूर्वकं रचितं भरतमुनेः "नाट्यशास्त्र मेव" प्राचीनमम् । ग्रीकु नाटकोत्पत्तेः बीजं संस्कृत रूपक प्रक्रिया एव इति गण्यते ।

अभिनवगुप्तेन विरचितं अभिनवकौमुदी व्याख्यानं नाटक रङ्ग अतीव रमणीयं अकरोत् । तदनन्तरं धनञ्जयस्य दशरूपकम्, शारदातनयस्य भावप्रकाशम्, विद्यानाथस्य प्रतापरुद्रीयम्, सिङ्गभूपलस्य रसार्णव सुधाकरम्, विश्वनथस्य साहित्यदर्पणम् प्रमुखाः लक्षण ग्रन्थाः प्रसिद्धाः बभूवुः । संस्कृत नाटकोत्पत्ति प्रकारं अति प्राचीनमिति ज्ञायते । पतञ्जलि महाभष्ये प्रस्थावित "कंसवध बलिबन्धः इति रूपक द्वयमेव इति आदिमस्थानीयमिति विचित्रम् ।

**रूपक विकासः :–** ताल, लय, गीत, वाद्य, अभिनयादि भङ्गिमैः आरभ्य संगीत सहचरीभूत संवादमपि स्वीकृत्य, पात्रपोषणा कथावस्तु प्राधान्यमपि परिगणय्य क्रमशः विकाशं प्राप्य रूपक प्रक्रिया सर्वङ्गसुन्दरं बभूव । प्रदर्शनाय अननुकूल विषयाः प्रवेशिका, विष्कम्भ आकाश भषितादि प्रक्रियेषु निक्षिप्य नाटकं परिणतिं प्राप ।

आद्यन्तम् एकैक दृश्यं न प्रदर्शन योग्यमिति परिभाव्य नाटके अङ्क विभजनं अवलम्भितम्। कथा वस्तु भेदात् एकाङ्किका प्रक्रियां आरभ्य पञ्च अङ्क परिमिति पर्यन्तं नाटकमिति, तदुपरि सप्त, दशाङ्कपर्यन्तं महानटकं इति च रूपक भेदाः । भरतवाक्यरूपेण अत्तमफलप्राप्तिः प्रेक्षकाणां हर्षोल्लसितं च नाटकपरिसमाप्तिः । अतएव कवेः निकषो फल प्रायं भूत्वा "नाटकान्तं हि साहित्यं" इति प्रशंस्यते । कालक्रमेण कवीनां प्रेक्षकाणां च रूचि भेदात् नागरिक विकासमपि अनुसृत्य विविध नाटक अङ्गाः परिणतिं प्राप्य नाटक प्रक्रिया सर्वतोमुखं बभूव ।

प्रेक्षक सम्मोदाय क्रमशः पुराण कथेतिवृत्तान् विसर्ज्य हास्य, श्रुङ्गारभरितानां नाटकानां रचना प्राचुर्यं प्राप । कल्पितेतिवृत्तं नाटक वस्तु रूपेण बहुभिः स्वीकृतम् ।

**रूपकभेदाः एवं निर्णीताः :–** भरत धनञ्जयादौ रूपक भेदाः (१०) दश इति निर्णीतवन्तौ । एते क्रमशः

**श्लो ।।** **नाटकंसप्रकरणां, भाणः प्रहसनं डिमः ।**
**व्यायोग समवकारौ वीध्यङ्केकहामृगा इति ।।** (द.रू. १-८)

१. **नाटकम्** : नाटकं नान्दि रूपदेवता अशीर्वाद प्रार्थना, अथवा वस्तु निर्देश प्रकारेण प्रारभ्यते । ततः सूत्रधारः प्रविश्यभारती वृत्तिमाश्रित्य, नटीनटानां संभाषण चमत्कृति पूर्वकं "आमुख" भवति । नाटके कथावस्तु प्रख्यातम् । वृद्धि विलास सुखदुःखाः प्रदर्शिताः । नाटके पञ्च सन्धयः पञ्च आरभ्य

दशपर्यन्तं अङ्काश्च वर्तन्ते । नायकः धीरोदात्तः । स च राजर्षिः दव्यो, दिव्यादिव्यो वा भवति । तस्य सहचराः चतुः पञ्च वा भवेयुः । श्रुङ्गारो वीरो वा अङ्गीरसं भूत्वा इतररसाः अङ्ग भूतानि भवेयुः । अन्ततोगत्वा अद्भुतरसः स्थानमाक्रमति । नायकस्य रसवत्तरं प्रत्यक्षवर्तनं अस्मिन् वर्णित योग्भम् । अङ्कान्ते सर्वे पात्राः निष्क्रमेयुः ।

उदा :- **१) कालिदास महाकवेः अभिज्ञानशाकुन्तलम् ।**
**२) विशाखदत्तस्य मुद्राराक्षसम् प्रभृतयः ।**

**२. प्रकरणम् :-** अस्मिन् कथावस्तु लौकिकम् । कल्पितं च । प्रथान रसः श्रुङ्गारः । नायकः द्विजोवा, अमत्यो वा वणिक् वा भवेत् । सः धीरशान्तः, सन् धर्मकामार्थ परायणः च भवेत् । शेषांशाः सर्वे नाटकस्य एव भवन्ति ।

**उदा** :- मालतीमाधवम्, मृच्छकटिकम् च ।

**३. भाणः** :- अस्मिन् कथावस्तु उत्पाद्यम् । धूर्तचरितिपूर्ण एकाङ्किका । कुशलः पण्डितश्च, विप्रः एक एव पात्र । शौर्य सौभाग्य वर्णना पूर्वकं मुखनिर्वहण सन्धियुतं (१०) दश लास्याङ्गी पूर्वकं भारतीवृत्ति आश्रित्य भवति ।

**उदा** :- लीलामधुकरम् ।

**४.प्रहसनम्** :- अस्मिन् काथा वस्तु कल्पितम् ।
श्रामिकजनानां चरित्र एव इतिवृत्तम् ।
प्राधानरसः हास्यम् । भाणे इव सन्धि सन्ध्यङ्ग
लास्याङ्ग, अङ्काः समान एव वर्तन्ते ।

**उदा** : - १) कन्दर्पकेलि, २) दूर्तचरितम्, ३) लटकमेलकम् च ।

**५. डिमम्** :- अस्मिन् कथा वस्तु प्रख्यातम् । इतिवृत्तम् मया, इन्द्रजाल युद्धादिभिः भरितम् । प्रधानरसः रौद्रः । शान्त, श्रुङ्गार हास्यरसवर्जितं । चतस्रः अङ्काः सन्ति । विष्कम्भप्रवेशिकौ अङ्गभू तौ ।नायिकाः चतुर्थश । कैशिकीवृत्तः विमर्श सन्धश्च न भवतः ।

**उदा** :- त्रिपुरदाहम् ।

**६. व्यायोगः** :- काथा वस्तु प्रख्यातम् । स्त्रीनिमित्तक भिन्नं कलहं वर्ण्यते । पुरुषपात्राणां आधिक्यम् । गर्भविमर्श सन्धिविवर्जितम् । एकाङ्किका । नायकः प्रख्यातो धीरोद्धतो वा भवेत् । सच राजर्षिः वा दिव्योवा भवेत् । कैशिकी वृत्तिविहीनम् । हास्य, श्रुङ्गार, शान्त रसानां वर्जयित्वा तदितरे प्रधान रसाः भवेयुः ।

**उदा** :- १) सौगन्धकाहरणम् २) मध्यमव्यायोगम् च ।

**७. समवकारः** :- कथा वस्तु प्रख्यतम् । देवासुरसम्बन्धि च विमर्शसन्धि विहीनम् । अङ्कत्रय परिमितम्। प्रथमाङ्के द्वे इतरेषु एकैकशः सन्धयः भवन्ति । तख्याताः उदात्ताश्च द्वादशनायकाः देवमानवाः नायकाः भवन्ति । सर्वेषां भिन्नफलं भवति । वीरः प्रधानरसः । क्वाचित्तेन कैशिकी वृत्तिः दृश्यते । एतत् प्रवेशिक रहितं च ।

**उदा** :- समुद्रमधनम् ।

**८. वीधि** :- अयं एकाड्क्प्रधानं । एकैव नायकः । आकाशभाषितं अश्रित्य चमत्कारयुतं उक्ति प्रत्युक्ति रूपेण संभाषणं करोति । प्राचुर्येण श्रुङ्गारः तदितर रसाः अल्पमात्रेण पोष्यन्ते । मुखनिर्वहणसन्धी, सर्वे अर्थ प्रकृतयः १३ वीधि अङ्गानि च वर्तन्ते ।

**उदा** :- मलविका ।

**९. अङ्कः** :- अस्य उत्सृष्टकाङ्कम् इति च नामान्तरम् । काथावस्तु प्रख्यातम् । कविकृत कल्पनेन वृद्धिं प्रप्नोति । एकाङ्कमात्रम् । चतुरहीनाः बहवः नायकाः सन्ति । प्रधान रसः करुणः । बहूनां स्त्रीणां शोक कारणम् । सन्धि वृति अङ्गादयः भाणे इव । अस्मिन् अपि वर्तन्ते । अस्मिन् जयापजयौ वैराग्य विचारौ च स्थानं आक्रमते । वागूरूपेण हि युद्ध वर्णनम् ।

**उदा** :- सर्मिष्ठाययाति

**१०. ईहामृगम्** :- कथावस्तु मिश्रमम् । चतुरङ्क समन्वितम् मुख, प्रतिमुख निर्वहण सन्धयः वर्तन्ते । प्रख्याताः धीरोद्धताश्य नरदिव्याः दिव्यनराः वा प्रतिनायकाः भवन्ति । दिव्यस्त्री निमित्तेन युद्धं प्रवर्त्य विश्रमितुं भवति । दश दिव्यपुरुषाः नायाकाः भवन्ति ।

**उदा** :- कुसुमशेखर विजयम् ।

**रूपकेषु आधिकारिक कथावस्तु** :-

१. प्रख्यात २. उत्पाद्य ३. मिश्रम भेदेन त्रिविधम् ।

१. प्रख्यातम् :- प्रसिद्ध ग्रन्थेभ्यः, स्वीकृतं वस्तु संयुतम् ।

२. उत्पाद्यं :- उत्पाद्यंतु कवि कपोल कल्पित कथा भरितम् ।

३. मिश्रमम् :- प्रसिद्धकथां अश्रित्य कवि कल्पनां च सम्मिलितम् ।

नायकः सर्व सद्गुणस्थानं भूत्वा चतुर्विधो भवति ।

ते चे १. धीरोदात्त : - उदा - दुष्यन्तः हरिश्चन्द्रो वा ।
२. धीरललितः - उदा - वत्सराजः उदयिनः ।
३. धीरोद्धतः - उदा - दुर्योधनः, रावणः वा ।
४. धीरशान्त : उदा - चारुदत्तः, मधवः च ।

**श्रुङ्गारनायिकाः** :- श्रुङ्गार रसमाश्रित्य अवस्था भेदेन नायि काः अष्ट विधा भवन्ति । १. स्वाधीन पतिका, २. वासवसज्रिका, ३. विरहोत्कण्टिता, ४. खण्डिता, ५. कलहान्तरिता, ६. विप्रलब्धा, ७. प्रोषितभर्तृका, ८. अभिसरिका चेति ।

**नवरसाः** :- ''रस'' शब्दस्य रुचिः सारम् इति द्वे अर्थे । ''आनन्दौ वै रसः'' इति निरुपितम् । अतः काव्यानन्दमेव ब्रह्मानन्द सहोदरं इति मन्यन्ते । एको रसः इति भवन्नपि रुचिभेदात् अवस्था भेदाश्च नव रसाः प्रकीर्तिताः ।

**ते च :**

**श्लो ।।** **श्रुङ्गार हास्य करुण रौद्र वीर भयानका : ।**
**भीभत्साद्भुतशान्ताश्च नव रसाः प्रकीर्तिताः ।।**

**उपसंहारः :-** यद्यपि संस्कृत रूपक साहत्यं अनादि भूत्वा कालानु गुण्येन परिवर्तयन् दिन दिनाभिवृद्धिं च प्राप्य आधुनिक काले रूपकभेदान् लक्षण भेदान् च अश्रित्य चलनचित्र, दूरश्रवण, दूरदर्शन प्रक्रियभे दान् अश्रित्य सर्वजन अह्लादकत्वं वैज्ञानिक वृद्धिं च कृत्वा, नाटकाः नाटिकाः, लघुनाटिकाः श्रुङ्कला, लघुचलनचित्राः इति बहुविध रूपान् अश्रित्य बह्मानन्द सहोदरं आनन्दं वयं प्राप्नुवन्ति । इति नाति शयोक्तिः । तेषां अनुभवात् अधुनातन जनानां समाजिकस्पृह वर्धते । जीवन नैपुण्ये च स्पूर्तिदायकाभूत्वा विविध रस अनुभवेन शान्तियुत जीवनं गमिष्यन्ति अस्मिन् समये रूपक भेदानुभवेन रसमय जीवनं गमयितुं वयं शक्नुवामः।

**उपयुक्त ग्रन्थसूचिः**

१) नाटयशास्त्रम् - भरतमुनिः ।
२) दशरूपकम् - धनञ्जयः ।
३) दशरूपक सारांशम् ।

::::: सर्वं रसमयम् जगत् :::::